# Shri Balashtottarashatanama Stotram 4

# શ્રીબાલાષ્ટોત્તરશતનામસ્તોત્રમ્ ૪

## Document Information

Text title : bAlAShTottarashatanAmastotram 4

File name : bAlAShTottarashatanAmastotram4.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Balasaparya

Latest update : August 23, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 22, 2022

*sanskritdocuments.org*

Shri Balashtottarashatanama Stotram 4

# શ્રીબાલાષ્ટોત્તરશતનામસ્તોત્રમ્ ૪

અગસ્ત્ય ઉવાચ-
હયગ્રીવ દયાસિન્ધો ભગવન્ભક્તવત્સલ ।
બાલાત્રિપુરસુન્દર્યા નામ્નામષ્ટોત્તરં શુભમ્ ॥

વદસ્વ મે ત્વં કૃપયા યેન જ્ઞાનં પ્રવર્તતે ॥ ૧
હયગ્રીવ ઉવાચ -
શ ૃણુ સમ્યક્પ્રવક્ષ્યામિ શ્રીબાલાષ્ટોત્તરં શતમ્ ।
સર્વવિદ્યાત્મકં જ્ઞેયં શ્રીબાલાપ્રીતિદાયકમ્ ॥ ૨
અસ્ય શ્રીબાલાષ્ટોત્તરશતનામસ્તોત્રમહામન્ત્રસ્ય દક્ષિણામૂર્તિઃ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । બાલાત્રિપુરસુન્દરી દેવતા ।
ઐં બીજમ્ । ક્લીં શક્તિઃ । સૌઃ કીલકમ્ ।
શ્રીબાલાપ્રિત્યર્થે નામપારાયણે વિનિયોગઃ ।
મૂલેન કરાઙ્ગન્યાસૌ ।

ધ્યાનં -
ઉદઞ્ચદ્દિનેશપ્રપઞ્ચ પ્રકાશાં
ઉદૂઢેન્દુરે ખામુદારાં ત્રિણેત્રામ્ ।
વહન્તીં વરાભીતિકોશાક્ષમાલાઃ
વહન્તીં સ્ફુટે હલ્લકે નૌમિ બાલામ્ ॥ ૧ var ૧ માલાસૃણીપુસ્તકપાશહસ્તાં બાલાં ભજેઽહં લલિતાં કુમારીમ્ ।
લમિત્યાદિ પઞ્ચ પૂજાઃ ।
(કુમારકામેશ્વરકેલિલોલાં નમામિ ગૌરીં નવવર્ષદોશ્યામ્ ॥)

કલ્યાણી ત્રિપુરા બાલા માયા ત્રિપુરસુન્દરી ।
સૌન્દર્યભાગ્યસંયુક્તા ક્લીઙ્કારી સર્વમઙ્ગલા ॥ ૨ ૩ var ૨ સુન્દરી સર્વસૌભાગ્યવતી હ્રીઙ્કારરૂપિણી ।
ઐઙ્કારી સર્વજનનીૅ૩ પરા પઞ્ચદશાક્ષરી । ( var ૩ સ્કન્દજનની ક્લીઙ્કારી પરમેશ્વરી ।
ત્રૈલોક્યમોહનાધીશા સર્વાશાપૂરવલ્લભા ॥ ૪ (સૌઃકારી સર્વશક્તિશ્ચ પરા પઞ્ચદશાક્ષરી ॥
સર્વસઙ્ક્ષોભણાધીશા સર્વસૌભાગ્યદાયિની ।

સર્વાર્થસાધકાધીશા સર્વરક્ષાકરાધિપા ॥ ૫
સર્વરોગહરાધીશા સર્વસિદ્ધિપ્રદાયિકા ।
સર્વાનન્દમયાધીશા યોગિનીચક્રનાયિકા ॥ ૬
ભક્તાનુરક્તા૪ રક્તાઙ્ગી શઙ્કરાર્ધશરીરિણી । var ૪ ભક્તાનુરક્ષા
પુષ્પબાણેક્ષુકોદણ્ડપાશાઙ્કુશલસત્કરા ॥ ૫ ૭ var ૫ પુષ્પબાણૈક્ષવધનુઃપાશાઙ્કુશલસત્કરા ।
સંવિદાનન્દલહરી૬ શ્રીવિદ્યા ત્રિપુરેશ્વરી । var ૬ સચ્ચિદાનન્દલહરી
સર્વસઙ્ક્ષોભિણીપૂર્વનવમુદ્રેશ્વરી શિવા૭ ॥ ૮ var ૭ પૂર્વા ચાનન્તમુદ્રેશી સર્વસઙ્ક્ષોભિણી શિવા ।
અનઙ્ગકુસુમારાધ્યા ચક્રેશી૮ ભુવનેશ્વરી । var ૮ અનઙ્ગકુસુમાપીડા ચક્રિણી
ગુપ્તા ગુપ્તતરા નિત્યા નિત્યક્લિન્ના મદદ્રવા૯ ॥ ૯ var ૯ નિત્યક્લિન્નમદદ્રવા
મોહિની પરમાનન્દા કામેશી તરુણી કલા ।
પદ્માવતી૧૦ ભગવતી પદ્મરાગકિરીટિની ॥ ૧૦ var કલાવતી૧૦
રક્તવસ્ત્રા રક્તભૂષા રક્તગન્ધાનુલેપના ।
સૌગન્ધિકમિલદ્વેણી મન્ત્રિણી મન્ત્રરૂપિણી ॥ ૧૧
તત્ત્વાસના૧૧ તત્ત્વમયી સિદ્ધાન્તઃપુરવાસિની । var તત્ત્વત્રયા૧૧
શ્રીમતી ચ મહાદેવી કૌલિની પરદેવતા ॥ ૧૨
કૈવલ્યરેખા વશિની ૧૨સર્વેશી સપ્તમાતૃકા । var સર્વમાતૃકા સર્વમઙ્ગલા૧૨
વિષ્ણુસ્વસા વેદવેદ્યા૧૩ સર્વસમ્પત્પ્રદાયિની ॥ ૧૩ var ૧૩વેદમયી દેવમાતા
કિઙ્કરીભૂત૧૪ગીર્વાણી સુધાપાનવિનોદિની । var ૧૪શ્રીવાણી
૧૫આધારપીઠનિલયા સ્વાધિષ્ઠાનસમાશ્રયા ॥ ૧૪ var ૧૫આધારવીથિપથિકા
મણિપૂરસમાસીના ચાનાહતનિવાસિની ।
૧૬આજ્ઞાચક્રાબ્જનિલયા ૧૭વિશુદ્ધિસ્થલસંશ્રયા ॥ ૧૫ var ૧૬આજ્ઞાપદ્માસનાસીના ૧૭વિશુદ્ધચક્રનિલયા ચાજ્ઞાચક્રનિવાસિની
અષ્ટાત્રિંશત્કલામૂર્તિઃ ૧૮સુષુમ્નાદ્વારમધ્યગા । var ૧૮સુષુમ્નાગારમધ્યગા
યોગીશ્વરમનોધ્યેયા૧૯ પરબ્રહ્મસ્વરૂપિણી ॥ ૧૬ var યોગીશ્વરમનોધ્યેયા૧૯
ચતુર્ભુજા ચન્દ્રચૂડા પુરાણાગમરૂપિણી ।
ઓઙ્કારી વિવિધાકારા પઞ્ચબ્રહ્મસ્વરૂપિણી૨૦ ॥ ૧૭ var ઓઙ્કારી વિમલા વિદ્યા પઞ્ચપ્રણવરૂપિણી૨૦
ભૂતેશ્વરી ભૂતમયી પઞ્ચાશત્પીઠરૂપિણી૨૧ । var પઞ્ચાશદ્વર્ણરૂપિણી૨૧
ષોઢાન્યાસમહાભૂષા કામાક્ષી દશમાતૃકા ॥ ૧૮
આધારવીથીપથિકા૨૨ લક્ષ્મીસ્ત્રિપુરભૈરવી । var આધારશક્તિરરુણા૨૨
રહઃપૂજાસમાલોલા રહોયજ્ઞસ્વરૂપિણી ॥ ૧૯
ત્રિકોણમધ્યનિલયા ષટ્કોણપુરવાસિની ।
વસુકોણપુરાવાસા ૨૩દશારદ્વયવાસિની ॥ ૨૦ var ૨૩દશારદ્વન્દ્વ

ચતુર્દશારકોણસ્થા વસુપત્રનિવાસિની ।
રજસ્વરાબ્જપત્રનિલયા વૃત્તત્રયનિવાસિનીઃ ॥ ૨૧ var રજસ્વરાબ્જચક્ર
ચતુરશ્રસ્વરૂપા ચ બિન્દુસ્થલમનોહરારપ। var બિન્દુસ્થલનિવાસિનીરપ
નામ્નામષ્ટોત્તરશતં ભવેદ્દેવ્યાઃ સમન્ત્રકમ્ ॥ ૨૨
પ્રત્યહં પૂજયેદ્બાલાં શ્રદ્ધાભક્તિસમન્વિતઃ ।
અર્ચયેત્કુઙ્કુમેનૈવ જાતીચમ્પકપઙ્કજૈઃ ॥ ૨૩
અન્યૈઃ સુગન્ધિકુસુમૈઃ કેતકીકરવીરકૈઃ ।
યોઽર્ચયેત્પરયા ભક્ત્યા સ લભેદ્વાઞ્છિતં ફલમ્ ।
ભક્ત્યા નિત્યં પઠેત્સમ્યગ્વાગીશ્વરસમો ભવેત્ ॥ ૨૪

ઇતિ શ્રીબાલાષ્ટોત્તરશતનામસ્તોત્રં (૪) સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shri Balashtottarashatanama Stotram 4*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*